## प्रधानमन्त्री –मुख्यमन्त्री

आर्थिक-व्यापार-स्थिरतां सुनिश्चेतुं, ऊर्जा-सुरक्षां सुनिश्चेतुं, नागरिकानां हितानां रक्षणाय, उद्योग-आपूर्तिशृङ्खलानां निर्माणं च पश्चिम-एशियायाः स्थितौ सर्वकारस्य एताः सर्वोच्चप्राथमिकताः सन्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना अवधानं दत्तम्। पश्चिम-एशिया-द्वन्द्वेन, भारते तस्य सम्भाव्यप्रभावस्य च दृष्ट्या देशस्य सज्जतां समीक्षितुं राज्यानां केन्द्रशासितप्रदेशानां च मुख्यमन्त्रीभिः उप-राज्यपालैः च सह ह्यः सायङ्काले आभासीय-माध्यमेन उच्च-स्तरीय-सभायाः अध्यक्षतां कुर्वन् श्रीमोदी इदम् उक्तवान्। सभायां प्रधानमन्त्रिणा केन्द्र-राज्ययोः मध्ये जागरूकतायाः, अग्रिम-योजनायाः, अविराम-समन्वयस्य च आवश्यकतायाः उपरि बलं प्रदत्तम्। श्रीमोदी दृढविश्वासं प्रकटितवान् यत् टीम्-इण्डिया-रूपेण मिलित्वा कार्यं कुर्वन् देशः उदयोन्मुखानां समाह्वानानां सफलतया निवारणं करिष्यति। सः उल्लिखितवान् यत् परिस्थितिः परिवर्तनशीला एव अस्ति तथा च निरन्तरं निरीक्षणस्य, द्रुतस्य, अनुकूल प्रतिक्रियानां च आवश्यकताः वर्तन्ते। श्रीमोदी, आपूर्तिशृङ्खलानां सुकरप्रक्रियां सुनिश्चेतुं, सञ्चयस्य, लाभार्जनस्य च विरुद्धं कठोरान् उपायान् स्वीकर्तुं च राज्येभ्यः आदिष्टवान्। सः कृषिक्षेत्रे अग्रिम-नियोजनस्य महत्त्वम् अपि अधोरेखितवान्, विशेषतः ग्रैष्मिक(खरीफ) -कालात् पूर्वं पर्याप्त-उर्वरक-उपलब्धतां सुनिश्चेतुं।

## प्रधानमन्त्री- जेवर्

प्रधानमन्त्री नरेन्द्रमोदी अद्य उत्तरप्रदेशस्य जेवर्-नगरे नोएडा-अन्ताराष्ट्रिय-विमानस्थानकस्य प्रथम-चरणस्य उद्घाटनं करिष्यति। विमानस्थानकं प्रायः द्विशताधिकैकादशसहस्रकोटिरूप्यकाणां व्ययेन विकसितम् अस्ति। अस्य विमानस्थानकस्य उद्घाटनम्, वैश्विक-विमानयान-केन्द्रम् भवितुं भारतस्य यात्रायां महत्त्वपूर्णं सोपानं निर्दिशति।

## अमित शाह- एसआईआर

भाजपेति दलस्य वरिष्ठः नेता तथा गृहमन्त्री अमितशाहः अवदत् यत्, मतदातृ-सूच्यां विशेष-गहन-संशोधनस्य (एस्. आई. आर्.) इत्यस्य उद्देश्यं, कपटाधारेण मतदातृ-सूच्यां समाविष्टानां नामानि निष्कासयितुं भवति। गतरात्रौ नवदिल्ल्यां निजी-वार्ता-वाहिन्याः सम्मेलने भाषमाणः श्रीशाहः अवदत् यत्, अस्य अभ्यासस्य उद्देश्यम् अस्ति मतदातृ-सूच्याः अखण्डतायाः, यथार्थतायाः च संरक्षणम्। सः अवदत् यत् एस्. आई. आर्. प्रक्रिया तमिळुनाडुराज्येन, केरलम् राज्येन च सह अनेकेषु राज्येषु समाह्वानानां बिनैव कृता अस्ति। सः अवोचत् यत् आक्षेपाः मुख्यतया पश्चिमवङ्गप्रदेशात् आगताः सन्ति, अन्येषु राज्येषु अस्य अभ्यासस्य सुगमतया कार्यान्वयनं दृष्टम्।

**बाइट-अमित शाह**

## कृषिमन्त्रिणौ

केन्द्रीयकृषि-कृषक-कल्याण-मन्त्री शिवराज सिङ्घ्-चौहानः महाराष्ट्रस्य कृषि-मन्त्रिणा दत्तात्रेय-विठोबा-भरणे-वर्येण सह नवदिल्ल्यां मिलितवान्। उपवेशने श्रीचौहानः कृषकाणां समर्थनाय, कृषि-आधारित संरचनाः निर्मातुं च केन्द्रस्य प्रतिबद्धतां पुनः दृढीकृतवान्। तटीयप्रदेशेषु अकाल-वृष्ट्या सस्यानां क्षतिम् अवलम्ब्य, श्री चौहानः अधिकारिभ्यः निर्देशं प्रदत्तवान् यत् प्रधानमन्त्री-फसल-बीमा-योजनायाः अन्तर्गतं प्रभाविताः कृषकाः अधिकं लाभं प्राप्नुयुः इति सुनिश्चितं कर्तव्यम्।

## आईपीएल

अन्ते क्रीडावर्तायाम्, आई पी एल इति इण्डियन्-प्रीमियर्-लीग् इत्यस्य ऊनविंशतितमं संस्करणम् अद्य सायङ्काले बेङ्गलूरुनगरस्य एम्. चिन्नास्वामी-क्रीडाङ्गणे आरभ्यते, यत्र गतविजेता-रायल्-चालेञ्जर्स्-बेङ्गलूरु दलं सन् राईजर्स्-हैदराबाद्- दलं सम्मुखी करिष्यति। एषा स्पर्धा सायं सार्द्ध सप्तवादने आरभ्यते, स्पर्धैषा मई मासस्य एकत्रिंशत् दिनाङ्कपर्यन्तं प्रचलिष्यति।

॥इति वार्ता:॥